## पक्षात्तिः । (२५/१८२६)

तस्य इत्येव[1] । तस्य इति षष्ठीसमर्थात् पक्षशब्दात् मूलेऽभिधेये [2]तिः प्रत्ययो भवति । मूलग्रहणमनुवर्तते, न पाकग्रहणम् (म.भा. २.३७५) । 'एकयोगनिर्दिष्टानामप्येकदेशो[3]ऽनुवर्तते' (व्या.प. २३) इति । पक्षस्य मूलं पक्षतिः प्रतिपत् ॥

## तेन वित्तश्चुञ्चुप्चणपौ । (२६/१८२७)

तेन इति तृतीयासमर्थात् वित्तः इत्येतस्मिन्नर्थे [4]चुञ्चुप् चणप् इत्येतौ प्रत्ययौ भवतः । वित्तः प्रतीतः [5]ज्ञात इत्यर्थः । विद्यया वित्तः [6]विद्याचुञ्चुः, [7]विद्याचणः[8] ॥

## विनञ्भ्यां नानाञौ नसह । (२७/१८२८)

वि नञ् इत्येताभ्यां यथासङ्ख्यं ना नाञ् इत्येतौ [9]प्रत्ययौ भवतः । [10]नसह इति प्रकृतिविशेषणम् (म.भा. २.३७५) । असहार्थे पृथग्भावे वर्तमानाभ्यां विनञ्भ्यां स्वार्थे नानाञौ प्रत्ययौ भवतः । विना । नाना ॥

## वेः शालच्छङ्कटचौ । (२८/१८२९)

विशब्दात् शालच् शङ्कटच् इत्येतौ [11]प्रत्ययौ भवतः । [12]ससाधनक्रियावचनात् उपसर्गात् स्वार्थे प्रत्ययौ भवतः । विगते शृङ्गे विशाले, [13]विशङ्कटे । तद्योगाद् गौरपि विशालः, विशङ्कटः इत्युच्यते । परमार्थतस्तु [14]गुणशब्दा एते यथाकथञ्चिद् व्युत्पाद्यन्ते । नात्र प्रकृतिप्रत्ययार्थयोर[15]भिनिवेशः ॥

## संप्रोदश्च कटच् । (२९/१८३०)

सम् प्र उद् इत्येतेभ्यः[16] कटच् प्रत्ययो भवति । चकाराद् वेश्च । सङ्कटम् । प्रकटम् । उत्कटम् । विकटम् ।

[५४७] [17]कटच्प्रकरणेऽलाबूतिलोमाभङ्गाभ्यो रजस्युपसङ्ख्यानम् ।

अलाबूनां रजः अलाबूकटम् । तिलकटम् । उमाकटम् । भङ्गाकटम् ।

[५४८] गोष्ठादयः स्थानादिषु [18]पशुनामादिभ्य उपसङ्ख्यानम् ।

गवां स्थानं गोगोष्ठम् । [19]महिषीगोष्ठम् ।

[५४९] सङ्घाते कटच् [20]वक्तव्यः ।

---

1. एव नास्ति फ. 2. तिप्रत्ययः फ. 3. एकदेशानुवृत्तिः फ, एकदेशानुवृत्तिः भवति क. ड, एकदेशानुवर्तनम् ग. व्या.पाठः 4. चञ्चुप् ड. 5. प्रख्यातः फ. 6. विद्याचञ्चुः ड, विद्य या चुञ्चुः इत्यधिकम् क. 7. विद्याचणः नास्ति ब.क.ह. 8. केशचुञ्चुः इत्यधिकम् क, केशचणः इत्यधिकम् ब.क.ह, सेवाचुञ्चुः इत्यधिकम् ड. 9. प्रत्ययौ नास्ति ह. 10. नसह–भवतः नास्ति क. 11. प्रत्ययौ नास्ति ग. 12. साधन° ह.ग. 13. विशङ्कटे नास्ति ग. 14. गुणशब्दात् क. 15. अभिनिवेष्टव्यम् क.फ.ह, नात्र प्रकृतिप्रत्ययार्थोऽभिनिवेष्टव्यः ड. 16. च इत्यधिकम् ब.ह. ग. 17. कटच्प्रकरणे नास्ति क.फ. 18. पशुनामभ्यः इति ड. 19. महिषीगोष्ठम् नास्ति क, अजागोष्ठम् ग. 20. वक्तव्यः नास्ति फ.